स्वल्पः, त्रि, (सुष्ठु अल्पः ।) अत्यल्पः । यथा,—
"नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात् ॥"
इति भगवद्गीतायाम् । २ । ४० ॥

स्वल्पकेशरी, [न्] पुं, (स्वल्पः केशरोऽस्यास्तीति । इनिः ।) कोविदारः । इति राजनिर्घण्टः ॥ (पर्य्यायोऽस्य यथा,—
"कोविदारश्चमरिकः कुद्दालो युगपत्रकः ।
कुण्डली ताम्रपुष्पश्च अन्तकः स्वल्पकेशरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

स्वल्पकेशी, [न्] पुं, (स्वल्पः केशोऽस्यास्तीति । इनिः ।) भूतकेशः । यथा,—
"गोलोमी स्वल्पकेशी च भूतकेशश्च केशहृक् ॥"
इति शब्दचन्द्रिका ॥
अत्यल्पकेशविशिष्टे, त्रि ॥

स्वल्पपत्रकः, पुं, (स्वल्पानि पत्राणि यस्य । कप् ।) गौरशाकः । स तु मधूकभेदः । यथा,—
"गौरशाको मधुकोऽन्यो गिरिजः स्वल्पपत्रकः ॥"
इति रत्नमाला ॥

स्वल्पफला, स्त्री, (स्वल्पं फलं यस्याः ।) हपुषाभेदः । तत्पर्य्यायः । कच्छूघ्नी २ ध्वाङ्क्षनाशिनी ३ प्लीहशत्रुः ४ विषघ्नी ५ कफघ्नी ६ अपराजिता ७ । अस्या गुणाः हपुषागुणतुल्याः । इति राजनिर्घण्टः ॥

स्ववासिनी, स्त्री, (स्वस्मिन् पित्रालये वसतीति । वस + णिनिः । ङीप् ।) ऊढा अनूढा वा पितृगृहस्थिता । तत्पर्य्यायः । चिरिण्टी २ । इत्यमरः ॥ "द्वे ऊढायामनूढायां वा पितृगृहस्थितायाम् । पितृकुलस्नेहात् चिरं एटति गच्छति चिरिण्टी । इट गतौ अन् मनीषादिः ।
'स्ववासिन्यां चिरिण्टी स्यात् द्वितीयवयसि स्त्रियाम् ॥'
इति रुद्रः ॥
चिरण्टीत्येके । स्वेषु ज्ञातिषु वसति स्ववासिनी ग्रहादित्वाणिन् । सुखेन वसति सुवासिनीति द्राविडाः ।" इत्यमरटीकायां भरतः ॥

स्वबीजः, पुं, (स्वं एव बीजं यस्य ।) आत्मा । इति शब्दरत्नावली ॥ निजकारणे स्वीयवीर्य्ये च क्ली ॥

स्वसा, [ऋ] स्त्री, (सुष्ठु अस्यते क्षिप्यते इति । सु + अस् + "सुञ्यसेरृन् ।" उणा० २ । ९७ । इति ऋन् यणादेशश्च । भगिनी । इत्यमरः । २ । ६ । २९ ॥ (यथा, मनुः । २ । ५० ।
"मातरं वा स्वसारं वा मातुलां भगिनीं निजाम् ।
भिक्षेत भिक्षां प्रथमं या चैनं नावमानयेत् ॥")

स्वस्क, ङ गत्याम् । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट् ।) ङ, स्वस्कते । इति दुर्गादासः ॥

स्वस्ति, अव्य, (सु + अस् + "सावसेः ।" उणा० ४ । १८० । इति तिः । बहुलवचनात् न भूभावः ।) आशीः । क्षेमम् । (यथा, महाभारते । ३ । १६६ । १३ ।
"स्वस्ति प्राप्नुहि कौन्तेय काम्यकं पुनराश्रमम् ॥")
पुण्यादि । इत्यमरः । ३ । ३ । २४० ॥ आशीराशीर्व्वादः । क्षेमं निरुपद्रवः । पुण्यं पापप्रक्षालनम् । एषु । आदिना मङ्गलादौ च स्वस्ति । स्वस्ति मङ्गलाशीर्व्वादपापनिर्णेजनादिष्विति भागुरिः । इति भरतः ॥ दानस्वीकारमन्त्रः । यथा, "ओमित्युक्त्वा प्रतिगृह्य स्वस्तीत्युक्त्वा सावित्रीं पठित्वा कामस्तुतिं पठेत् ॥" इति शुद्धितत्त्वम् ॥ तद्योगे चतुर्थी स्यात् । यथा,—
"स्वाहाग्नये स्वधा पित्रे स्वस्ति धात्रे नमः सते ॥"
इति मुग्धबोधव्याकरणम् ॥
(स्त्रीलिङ्गेऽपि दृश्यते । यथा, भागवते । ४ । २४ । ३३ ।
"जितं त आत्मविद्धुर्य्य स्वस्तये स्वस्तिरस्तु मे ।
भवता राधसा राद्धं सर्व्वस्मा आत्मने नमः ॥"
तथा च वाजसनेयसंहितायाम् । १३ । १८ ।
"अग्निष्टाभिपातु मह्या स्वस्त्या छर्दिषा शन्तमेन ॥")

स्वस्तिकः, पुं, क्ली, (स्वस्ति क्षेमं कायति कथयतीति । कै + कः ।) आढ्यानां गृहविशेषः । इत्यमरः । २ । २ । १० ॥ तस्य लक्षणं यथा,—
"स्वस्तिकं प्राङ्मुखं यत् स्यादलिन्दानुगतं भवेत् ।
तत्पार्श्वानुगतौ चान्यौ तत्पर्य्यन्तगतोऽपरः ॥"
इति भरतधृतमात्स्यः ॥
अन्यद्वास्तुशब्दे द्रष्टव्यम् ॥ शितावरशाकः । इति राजनिर्घण्टः ॥
("शितिवारः शितिवरः स्वस्तिकः सुनिषण्णकः ।
श्रीवारकः सूचिपत्रः पर्णकः कुक्कुटः शिखा ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)
योगाङ्गासनविशेषः । तस्य लक्षणं आसनशब्दे द्रष्टव्यम् ॥

स्वस्तिकः, पुं,(स्वस्ति क्षेमं स्त्यायतीति । कै + कः) मङ्गलद्रव्यम् । तत्तु तण्डुलचूर्णनिर्म्मितत्रिकोणाकाराधिवासद्रव्यम् । चतुष्पथः । गृहभेदः । इति मेदिनी ॥ पिष्टकविकारः । रततालिकः । इति विश्वः ॥ जिनानां चतुर्व्विंशतिचिह्नान्तर्गतचिह्नविशेषः । यथा,—
"वृषो गजोऽश्वः प्लवगः क्रौञ्चोऽब्जं स्वस्तिकः शशी ।
मकरः श्रीवत्सः खड्गी महिषः शूकरस्तथा ॥
श्येनो वज्रं मृगश्छागो नद्यावर्त्तो घटोऽपि च ।
कूर्म्मो नीलोत्पलं शङ्खः फणी सिंहोऽर्हतां ध्वजाः ॥"
इति हेमचन्द्रः ॥
लशुनकः । इति त्रिकाण्डशेषः । (सर्पफणास्थितनीलरेखाविशेषः । यथा, रामायणे । १ । १९५ ।
"शिरोभिः पृथुभिर्नागा व्यक्तस्वस्तिकलक्षणैः ।
वमन्तः पावकं घोरं ददंशुर्दशनैः शिलाः ॥")

स्वस्तिमुखः, पुं, (स्वस्ति मुखे प्रथमे वदने वा यस्य ।) लेखः । ब्राह्मणः । वन्दिनि, त्रि । इति मेदिनी ॥

स्वस्तिवाचनं, क्ली, (स्वस्ति मङ्गलस्य वाचनम् ।) माङ्गल्यकर्म्मारम्भकालीनवक्ष्यमाणमन्त्रोच्चारणपूर्व्वकतण्डुलविकिरणम् । तन्मन्त्रो यथा । अमुककर्म्मणि पुण्याहं भवन्तो ब्रुवन्तु । इत्युक्ते पुण्याहमिति ब्राह्मणैस्त्रिरुक्ते अमुककर्म्मणि ऋद्धिं भवन्तो ब्रुवन्तु । ततः ऋध्यतामिति ब्राह्मणास्त्रिर्ब्रूयुः । एवं स्वस्ति भवन्तो ब्रुवन्तु । इत्युक्ते स्वस्ति इति ब्राह्मणास्त्रिर्ब्रूयुः । ततः ॥ स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः । स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ इति पठित्वा तण्डुलान् विकिरेत् ॥ * ॥ प्रमाणं यथा, व्यासः ।
"संपूज्य गन्धपुष्पाद्यैर्ब्राह्मणान् स्वस्ति वाचयेत् ।
धर्म्मे कर्म्मणि माङ्गल्ये संग्रामाद्भुतदर्शने ॥"
धर्म्मे कर्म्मणि इति अशमीनिर्द्देशात् अमुककर्म्मणि स्वस्ति भवन्तो ब्रुवन्तु इति ब्रूयात् । यमः ।
"पुण्याहवाचनं दैवे ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं कुर्य्यात् क्षत्त्रियवैश्ययोः ॥
सोङ्कारं ब्राह्मणे ब्रूयात् निरोङ्कारं महीपतौ ।
उपांशु च तथा वैश्ये शूद्रे स्वस्ति प्रयोजयेत् ॥"
इत्युद्वाहतत्त्वम् ॥ * ॥
अपि च ।
नन्द उवाच ।
"अलक्षितोऽस्मिन् रहसि मामकैरपि गोव्रजे ।
कुरु द्विजातिसंस्कारं स्वस्तिवाचनपूर्व्वकम् ॥"
इति श्रीभागवते १० स्कन्धे ८ अध्यायः ॥

स्वस्थः, त्रि,(स्वस्मिन् तिष्ठतीति । स्व + स्था + कः ।) सुस्थः । यथा,—
"दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।"
इति देवीमाहात्म्यम् ॥
("स्वस्थस्यापि समधातूनां साम्यानुग्रहार्थमेव कुशला रसगुणानाहारविकारांश्च पर्य्यायेणेच्छन्त्युपयोक्तुम् । मात्रासमाख्यातानेकप्रकारभूयिष्ठांश्चोपयुञ्जानास्तद्विपरीतकरणलक्षणसमाख्यातचेष्टया सममिच्छन्ति कर्त्तुम् । देशकालात्मगुणविपरीतानां हि कर्म्मणां आहारविकाराणाञ्च क्रियोपयोगः सम्यक् । सर्व्वाभियोगोऽनुदीर्णानां सन्धारणमसन्धारणमुदीर्णानाञ्च गतिमतां साहसानाञ्च वर्ज्जनम् । स्वस्थवृत्तमेतद्धातूनां साम्यानुग्रहार्थमुपदिश्यते ।" इति चरके शारीरस्थाने षष्ठेऽध्याये ॥ * ॥
"उत्थायोत्थाय सततं स्वस्थेनारोग्यमिच्छता ।
धीमता यदनुष्ठेयं तत् सर्व्वं संप्रचक्ष्यते ॥
तत्रादौ दन्तपवनं द्वादशाङ्गुलमायतम् ।
कनिष्ठिकापरीणाहमृज्वग्रथितमव्रणम् ॥"
इत्यादिकं सुश्रुते चिकित्सितस्थाने २४ अः ॥
"समदोषः समाग्निश्च समधातुमलक्रियः ।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते ॥"
इति च तत्रोत्तरतन्त्रे ६४ अध्यायः ॥)

स्वस्त्रीयः, पुं, (स्वसुरपत्यं पुमानिति । स्वसृ + "स्वसुश्छः ।" ४ । १ । १४३ । इति छः ।